19R

# टिळक महाराष्ट्र विद्यापीठ, पुणे

**संस्कृत विशारद (बी.ए.) – नियमित**

**परीक्षा : डिसेंबर– २०२३**

**सत्र ४ थे**

**विषयः भारतचम्पू (19R444)**

| दिनांक : २२/१२/२०२३ | गुण : ६० | वेळ : दु. २.०० ते दु. ४.३० |
|---|---|---|

**सूचना :** सर्व प्रश्न अनिवार्य

**प्र.१. केषामपि त्रयाणां स्वभाषया अनुवादं करणीयम्।** **(१५)**

१) सन्तानमूलमिदमेकमपत्यमास्ते संवर्तकालसहजश्च स राक्षसेन्द्रः।
सम्भूयते च समयः क्षपया महत्या सन्तीर्यतां कथमियं सखि मे विपत्तिः।

२) अथ कदाचन मृगयोपलालितहृदयो नरेश्वरोऽयमश्वे शशिश्वेततेजसि विश्वातिशायिनि रयविजितमातरिश्वनिकृताधिरोहः। कृताधिरोहः पार्श्वधृतविश्वकद्रुभिरनेवागुरोपकरणानुरोधैर्यौधैरनुद्रुतो मृदुभद्रविनयाभ्यां यदुमद्रतनयाभ्यामनुविद्धः सिद्धगणगणनीयमहिमवतो हिमवतोऽवजगाहे महतीमटवीतटवीथिकाम्।।

३) एकदा सायमन्तर्गृहे निरवग्रहं निष्पतद्भिर्बाष्पैस्तरङ्गितोत्तमाङ्गमुत्सङ्गभुवि पत्युरपशयं पुरोधाय यातुधानापराधभयानुरोधेन मन्दितं क्रन्दितमुत्सृजन्तीं कुन्ती समुपसृत्य विषादनिदानं विप्रायताक्षीमप्राक्षीत्। सापि तां कृपालुतया हृदि लगद्गदां गद्गदाक्षरमाचचक्षे।।

४) रहसि नलिनतल्पे रत्नपर्यङ्ककल्पे दिनविरतिसमीरैः सेव्यमानः स भीमः।
तटभुवि कुसुमानां तादृशैर्गन्धपूरैरधिकमलसताया हानिदद्रौ निदद्रौ।।

५) आबिभ्रतो धरणिमङ्गदनिर्विशेषं नानाधनायतिभिरस्य नयादिताभिः।
पस्त्यं समस्तमपि वासवसन्निभस्य कोशीबभूव कुतुकैः सह कौरवाणाम्।।

**प्र.२. त्रयाणां ससन्दर्भं स्पष्टीकरणं कुरुत।** **(१५)**

१) निन्द्यन्ते पितृभिस्तप्तैर्निरपत्यधनः पुमान्।
२) दम्भोलिमिव सहस्राक्षः शापमुदस्राक्षीत्।
३) नयानाम्बुभिः स विदधे लोकं नदीमातृकम्।
४) समीरसूनुं समुपेत्य जिह्वाबहिःप्रसारान् बहुशो वितेनुः।
५) मलिनतामनयन्त कलेवरं मदकलाः कलभा इव धूलिभिः।

**प्र.३. सविस्तरं द्वौ लिखत।** **(२०)**

१) बकासुरवधम्
२) राजधानीवर्णनम्
३) पाण्डवबाल्यवर्णनम्

**प्र.४. अ) रूपपरिचयं लिखत।** **(०४)**

विनिर्गताः, ताभ्यः, आधाय, रहसि

**आ) संधिविग्रहं कुरुत।** **(०३)**

१) तन्निदेशादहानि
२) हिमवतोऽवजगाहे
३) पत्युरपत्यं

**इ) समासानां नामनिर्देशपूर्वकं विग्रहं कुरुत।** **(०३)**

१) हलधरेण
२) श्वेततेजः
३) मन्दाकिनी

----------